RASHTRIYA SANSKRIT VIDYAPEETHA :: TIRUPATI
(University established under Section 3 of UG

*Mahamahopadhyaya*
Prof. G.S.R.Krishna Murty
Academic Coordinator,
HoD, Department of Sahitya,
Co-ordinator, Remedial Coaching Centre
& Sanskrit Science Exhibition
Editor, Rasadhuni (Research Journal)

Ph: 0877-2283167
Mob: 09441408796

Date: 24/06/2014

## CERTIFICATE

This is to Certify that **Smt. Rayudu Aruna Devi** Research Scholar submitted article entitled "**श्रीवेदान्तदेशिकविरचित–सुदर्शनविषयकस्तुति :**"Academic Coordinator," and which will be published in the "Rasadhuni", Sahitya Department Research Journal (ISSN No. 2320 - 4117) shortly.

It has been accepted for publication in the 2nd Edition of our department Research Journal "Rasadhuni".

(PROF. G.S.R.KRISHNA MURTHY)
Head, Department of Sahitya
RASHTRIYA SANSKRIT VIDYAPEETHA
TIRUPATI - 517 507 (A.P.)

# श्रीवेदान्तदेशिकविरचित-सुदर्शनविषयकस्तुतिः

*रायुडु अरुणादेवी*
शोधच्छात्रा, आगमविभागः
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

सुदर्शनस्तोत्राणि बहूनि बहुभिः कृतानि बहुत्रोपलभ्यन्ते। तेषु श्रीमद्भिः वेङ्कटनाथ-वेदान्तदेशिकैः सुदर्शनविषये स्तोत्रद्वयमुक्तम् - सुदर्शनाष्टकम्, षोडशायुधस्तोत्रमिति, तद्द्वयमत्र विव्रियते।

त्रयोदशशतके वेङ्कटनाथनामकः कवि-तार्किककेसरीति बिरुदभाक् भगवतो वेङ्कटेश्वरस्य घण्टावतारः कश्चन महानुभावः समुदभूत् दक्षिणदेशे । वेदान्ताचार्यबिरुदेन विभूषितस्सन् बहूनि स्तोत्राणि, विशिष्टाद्वैतग्रन्थान् व्याख्यानानि चारचयत। तदीयस्तोत्रेषु सुदर्शनस्य विषयेऽपि सुदर्शनाष्टकम्, अत्यन्तप्रसिद्धम्।

## सुदर्शनाष्टकम्

स्तोत्रमिदं धाटीवृत्तसमन्वितं जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन इति मकुटेन च युतं अष्टभिः श्लोकैः सह विराजमानं सत् तन्नाम्नैव सुदर्शनाष्टकमिति प्रसिद्धमभवत्। सुदर्शनस्य कीर्तिरस्मिन् स्तोत्रे जेगीयते। सुदर्शनस्य स्वरूपं प्रभावश्चात्र जोघुष्यते। सुदर्शनो रणप्रियः, समरोत्साहीत्यभिवर्ण्यते।

विरोधिसैन्यस्य भीषणऽयम्। अनेकसद्गुणान्यस्य भूषणत्वेन वर्तन्ते। संसारभयं नाशयति सुदर्शनः। सर्वस्यापि लोकस्य यथावत् धृतिं साधयति सुदर्शनः। वेदोक्तान् सर्वानपि धर्मान् सम्यक् दर्शयति, समस्तदुष्कर्मनाशको भवति श्रीसुदर्शनः। तादृशः सुदर्शनः जयतु जयतात्।

सृष्टिकाले समस्तमपि जगदलङ्करोति। देवानामसुरेभ्यो जायमानं भीतिं निवारयति। चतुर्मुखब्रह्मणा अभिनन्दितः, देवराजेन इन्द्रेण अभिवन्दितश्च आसुरनाशनेन। अहिर्बुध्न्येन शङ्करेणाराधितस्सन् तस्य प्रत्यक्षमभवत्। तादृशः सुदर्शनः जयतु जयतात्।

सहस्रादित्यसङ्काशः सुदर्शनः स्फुटविद्युज्ज्वालाभिः मण्डितो वर्तते। बहुभिरग्निज्वालाभिः प्रकाशमानो भवति। सदा नूतनं देहकान्तिं धत्ते। अल्पज्ञानामनधिगतो भवति। बहुभिरायुधैः संसेव्यमानो भूत्वा आश्रितानां रक्षणे सदा चिन्तयन् वर्तते। तादृशः सुदर्शनः जयतु जयतात्।

सदा विष्णोः सेवायां रतस्सन् श्रीवैकुण्ठवासं कुर्वन्, भगवतो गुणैः ज्ञान-शक्ति-बलैश्वर्य-वीर्य-तेजोभिः षड्गुणैः नितरां प्रकाशमानः, अनन्तैरपि वेदैः स्वहिमानं निरूपयन् स्वीयपरव्यूहवैभवं विस्तारयति। नरसिंहरूपिणं हयग्रीवरूपिणं च विष्णुं द्विषतोः हिरण्याक्ष-हिरण्यकशिपोः संहारं कृतवान् सुदर्शनः। वेदापहारिणं हिरण्याक्षं हयवदनरूपेण, नरसिंहस्य नखेषु सुदर्शनः स्थित्वा हिरण्यकशिपुं वक्षःस्थलं विदार्य जघानेति, वेदापहारिणं सोमकासुरं च मत्स्यावतारेण विष्णुना निहन्यमाने सुदर्शनः महामत्स्यस्य शृङ्गे स्थित्वा तमहनदिति च पुराणप्रसिद्धिः। तादृशः सुदर्शनः जयतु जयतात्।

राक्षसानां प्रसारं सुदर्शनः अकर्तयत्। रक्षोमायां च निरुणद्धि च। जन्मरूपान्धकारं नाशयति। सेवकानामज्ञानं निवर्तयति। देवैः बहुवारंमस्य पराक्रमो दृष्टः विविधेषु देवदानवसंग्रामेषु। रणरङ्गे सर्वत्र चक्ररूपेण परिभ्रमन् सर्वानपि शत्रून् स्वतेजसा संहरति। तादृशः सुदर्शनः जयतु जयतात्।

विरोधिसैन्यं सर्वमपि निगृह्णाति सुदर्शनः। विस्ताराणामायुधानां सर्वेषामपि नायकः। बहुविधमालाभिरलङ्कृतः। समस्तानामसुरमायानामतीतः। षट्कोणयन्त्रे स्थिरवासं करोति। आश्रितसंरक्षणे बद्धदीक्षश्च भवति। तादृशः सुदर्शनो जयतु जयतात्।

सुदर्शनपूजनं सकलसम्पत्करं भवति। षडक्षरमहामन्त्रानुष्ठानेन ऐश्वर्यप्राप्तिर्भवति। सुदर्शनः षडरचक्रे स्थिरनिवासी प्रतिष्ठितो भवति। हरिसङ्कल्पानुगणं समस्तमपि जगत् सृजति, रक्षति, संहरति च । विष्णुभक्तानां महाज्ञानिनां मार्गदर्शको भवति। तादृशो सुदर्शनः जयतु जयतात्।

सकलजगन्नायकः सुदर्शनः भगवत्स्वरूपप्रतिपादकवेदात्मकः। यज्ञयागेषु वेदमन्त्रैः प्रज्वाल्यमानोऽग्निः सुदर्शनस्य तेज एव । निरन्तरं जगद्व्यापरं रचयन् समस्तस्यापि जगतः कल्याणं विदधाति सुदर्शनः। आश्रितजनानां निखिलासुरप्रकृतिभ्योऽभयं दत्वा संरक्षति। तादृशः सुदर्शनः जयतु जयतात् ।।

श्रीमद्वेदान्तदेशिक-वेङ्कटनाथेन रचितं समस्तवेदसारभूतमिदं सुदर्शनाष्टकं नित्यं ये पठन्ति तेषां क्लिष्टा अपि मनोरथाः सर्वेऽवश्यं सुदर्शनेन सम्पूर्यन्ते ।।

## श्रीषोडशायुधस्तोत्रम्

श्रीमता वेदान्तदेशिकमहोदयेन सुदर्शनस्तोत्रप्रस्तावे सुदर्शनकवचरूपेण षोडशायुधस्तोत्रमेकं रचितम्। अस्मिन् स्तोत्रे सुदर्शनस्य षोडश बाहुषु विराजमानानि दिव्यानि षोडशायुधानि षोडश श्लोकेषु संस्तूयन्ते। षोडशबाहुः सुदर्शनः सदास्मान् रक्षतु इति संप्रार्थनमस्मिन् स्तोत्रे क्रियते। एतत्स्तोत्रपाठकस्य नित्यं सुदर्शनः सर्वत्र रक्षां विदधाति। स्वसङ्कल्पानुगुणं सुदर्शनः स्कीयं रूपं सकलायुधैश्च आविष्करोति।

सुदर्शनः सर्वेषामायुधानामधिपः। सर्वाण्यपि शस्त्राणि अस्त्राणि च सुदर्शने एन्तर्भवन्ति। सुदर्शनमतीत्य न किमपि शस्त्रमस्त्रं वा प्रतिफलति। षोडशबाहुषु सुदर्शनः दिव्यानि षोडशायुधानि धत्ते। जगच्चक्रं सर्वमपि सुदर्शनस्याधीने वर्तते। भूत-भविष्द्-वर्तमानरूपकालचक्रमपि सदा सुदर्शनस्यैवाधीने चलति। चक्ररूपी भगवान् सुदर्शनः सदा अस्मान् रक्षतु इति सुदर्शनाराधकैः संप्रार्थ्यते। आयुधेषु सर्वेषु सुदर्शनचक्रं सर्वोत्कृष्टम्। तस्मादेव परशुलाञ्छिताः शतशो रुद्राः सञ्जायन्ते। तादृशसुदर्शनस्य परशुरूपायुधमस्मान् सदा परिपालयतु । सुदर्शनस्य हेतिराज इति प्रसिद्धिः। सुदर्शनस्य प्रयोगमात्रेणैव सर्वे दैत्याः पक्षिण इव प्राणभीत्या उत्पलायन्ते। कुन्तायुधधारी सुदर्शनः तादृशोऽस्मानवतु । निरङ्कुशः सुदर्शनः दिग्गजान् स्वयं वशे स्थापयति । विष्णुभक्तानां आशापाशेभ्यो विमोचयति सुदर्शनः स्वीयेनाङ्कुशायुधेन। सर्वेषां प्राणिनां पुराकृतपापसञ्चयं सर्वमपि सुदर्शनः स्पर्शमात्रेण अग्नौ तूलमिव समूलं दहति। ज्ञानस्वरूपः सुदर्शनः चेतनानामज्ञानतिमिरं स्वप्रकाशेन ज्ञानात्मकतेजसा नाशयति। तेन तत्त्वज्ञानरूपं फलं ददाति। ततो निःश्रेयससिद्धिर्भवति।

विष्णोः स्वाभाविकी शक्तिः सर्वोत्कृष्टाभवति। सा शक्तिर्द्विधा वर्तत इति श्रूयते -

परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च ।

इति। इच्छाशक्तिः, क्रियाशक्तिरिति उभयोर्मध्ये इच्छाशक्तिः मनसि तिष्ठति, सा महालक्ष्मीरूपा। क्रियाशक्तिः बहिर्भवति। सा सुदर्शनरूपा। सा सर्वापेक्षया अत्यन्तशक्तिमती सुदर्शननामिका । तस्याः कदापि कुण्ठो न भवति। सा शक्तिरस्माकमशक्तिं निवारयेत। पाञ्चजन्यनामकः शङ्खः शब्दे बहुतीव्रतरः। स्थित्या स ज्ञानप्रदायकः। आयुधेन्द्रस्य सुदर्शनस्य हस्ते वर्तमानोऽयं शङ्खः अस्माकं ज्ञानदायको

भवतु। चक्रेश्वरस्य हस्ते वर्तमानो धनुः सात्त्विकाहङ्कारं संवर्धयतु। सुदर्शनः सर्वस्यापि विश्वस्य सृष्टिं करोति। सुदर्शनस्य हस्ते धृतः पाशः अस्माकं पापविमोचनं करोतु। सर्वत्र विहरतो हेतिराजस्य हलायुधमस्माकं विजयं साधयतु। सर्वेष्वायुधेषु बलिष्ठं वज्रायुधम्। सुदर्शनोऽपि सर्वेभ्य आयुधेभ्यः बलवान्। तस्मादधिकः शक्तिशाली आयुधमन्यत् नास्ति। वज्रायुधोऽपि दधीचिमुनेः अस्थितः संभूतम्। सुदर्शनस्तु अदधीच्यस्थिसंभव इति जोघुष्यते। स्वाभाविकवज्ररूपी सुदर्शनः, तस्य हस्ते वर्तमानं वज्रायुधं च अस्मान् संरक्षतु। सुदर्शनस्य हस्ते स्थिता गदा विश्वस्य सर्वस्यापि संहारकशक्तिः भवति। अस्माकमज्ञाननाशकं बुद्धिरूपिणं गदायुधं वयं प्रार्थयाम। सुदर्शनहस्ते वर्तते अन्यदायुधं मुसलनामकम्। तत् अस्माकं मोहं नाशयतु। तथैव शत्रुसंहारकं शूलायुधमस्माकं कष्टं सर्वं शामयतु । तथैव सर्वेषामायुधानां जनकः सुदर्शनः सदा अस्मानवतु इति रक्षसंप्रार्थना अस्मिन् स्तोत्रे क्रियते।